# नवग्रहस्तोत्रम्

भास्वान् मे भासयेत् तत्त्वं चन्द्रश्चाह्लादकृद्भवेत् ।
मङ्गळो मङ्गळं दद्यात् बुधश्च बुधतां दिशेत् ॥ १॥

गुरुर्मे गुरुतां दद्यात् कविश्च कवितां दिशेत् ।
शनिश्च शं प्रापयतु केतुः केतुं जयेऽर्पयेत् ॥ २॥

राहुर्मे राहयेद्भोगं ग्रहाः सन्तु करग्रहाः ।
नवं नवं ममैश्वर्यं दिशन्त्वेते नवग्रहाः ॥ ३॥

शने दिनमणेः सूनो स्वनेकगुणसन्मणे ।
अरिष्टं हर मेऽभीष्टं कुरु मा कुरु सङ्कटम् ॥ ४॥

हरेरनुग्रहार्थाय शत्रूणां निग्रहाय च ।
वादिराजयतिप्रोक्तं ग्रहस्तोत्रं सदा पठेत् ॥ ५॥

इति श्रीमद्वादिराजपूज्यचरणविरचितम्

नवग्रहस्तोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु